॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय ४५

गतेषु वानरेन्द्रेषु रामः सुग्रीवमब्रवीत् ।
कथं भवान्विनाजीते सर्वं वै मण्डलं भुवः ॥ १॥

सुग्रीवस्तु ततो राममुवाच प्रणतात्मवान् ।
श्रूयतां सर्वमाख्यास्ये विस्तरेण नरर्षभ ॥ २॥

यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम् ।
परिकालयते वाली मलयं प्रति पर्वतम् ॥ ३॥

तदा विवेश महिषो मलयस्य गुहां प्रति ।
विवेश वाली तत्रापि मलयं तज्जिघांसया ॥ ४॥

ततोऽहं तत्र निक्षिप्तो गुहाद्वारिविनीतवत् ।
न च निष्क्रमते वाली तदा संवत्सरे गते ॥ ५॥

ततः क्षतजवेगेन आपुपूरे तदा बिलम् ।
तदहं विस्मितो दृष्ट्वा भ्रातृशोकविषार्दितः ॥ ६॥

अथाहं कृतबुद्धिस्तु सुव्यक्तं निहतो गुरुः ।
शिलापर्वतसङ्काशा बिलद्वारि मया कृता ।
अशक्नुवन्निष्क्रमितुं महिषो विनशेदिति ॥ ७॥

ततोऽहमागां किष्किन्धां निराशस्तस्य जीविते ।
राज्यं च सुमहत्प्राप्तं तारा च रुमया सह ।
मित्रैश्च सहितस्तत्र वसामि विगतज्वरः ॥ ८॥

आजगाम ततो वाली हत्वां तं दानवर्षभम् ।
ततोऽहमददां राज्यं गौरवाङ्ययन्व्रितः ॥ ९॥

स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेन्द्रियः ।
परिलाकयते क्रोधाद्धावन्तं सचिवैः सह ॥ १०॥

ततोऽहं वालिना तेन सानुबन्धः प्रधावितः ।
नदीश्च विविधाः पश्यन्वनानि नगराणि च ॥ ११॥

आदर्शतलसङ्काशा ततो वै पृथिवी मया ।
अलातचक्रप्रतिमा दृष्टा गोष्पदवत्तदा ॥ १२॥

ततः पूर्वमहं गत्वा दक्षिणामहमाश्रितः ।
दिशं च पश्चिमां भूयो गतोऽस्मि भयशङ्कितः ।
उत्तरां तु दिशं यान्तं हनुमान्मामथाब्रवीत् ॥ १३॥

इदानीं मे स्मृतं राजन्यथा वाली हरीश्वरः ।
मतङ्गेन तदा शप्तो ह्यस्मिन्नाश्रममण्डले ॥ १४॥

प्रविशेद्यदि वा वाली मूर्धास्य शतधा भवेत् ।
तत्र वासः सुखोऽस्माकं निरुद्विग्नो भविष्यति ॥ १५॥

ततः पर्वतमासाद्य ऋश्यमूकं नृपात्मज ।
न विवेश तदा वाली मतङ्गस्य भयात्तदा ॥ १६॥

एवं मया तदा राजन्प्रत्यक्षमुपलक्षितम् ।
पृथिवीमण्डलं कृत्स्नं गुहामस्म्यागतस्ततः ॥ १७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com